M. T. B. COLLEGE, SURAT
Manuscripts Library

Satre

No. Ref. / Ser. 1154

Title: Shama Padhati

1154

Complete

C

Shama Padhati		Title
		Author
		Editor
SK		Year, Vols.
		Publisher
1154		Remarks

श्या.प. ॥ ततो चंद्रमंडलामृतप्लावनेन स्वयं च सा सती षट्चक्रस्थदेवतास्तर्पयंती कुंडलिनी
॥ १ ॥ अनाहतचक्रे समानीय तत्र रत्नखचितसिंहासने ध्यानोक्तरूपदेवतापरिणतां ध्या
त्वा ॥ मूलं ॥ श्रीदक्षिणकालिकायाः निर्माल्यमपकर्षयामि नमः ॥ मूलं ॥ श्रीदक्षि
णाकालिकायाः कर्पूरशकलैर्दंतशुद्धिं कल्पयामि नमः ॥ मूलं ॥ श्रीदक्षिणाका
लिकायाः स्वर्णशलाकया जिह्वोल्लेखनं कल्प० ॥ मूलं ॥ श्रीदक्षिणाकालिकायाः
सुगंधकोष्णजलगंडूषैर्मुखप्रक्षालनं कल्प० ॥ मूलं ॥ श्रीदक्षि० याः सूक्ष्मवस्त्रेण
मुखप्रोंछनं क० ॥ मू० ॥ श्रीदक्षि० याः अष्टगंधैस्तिलकं कल्प० ॥ ततो मानसैः संपू ॥ १ ॥
ज्य ॥ मूलविद्यां जप्त्वा जपं समर्प्य प्रार्थयेत् ॥ त्रैलोक्यचैतन्यमयि त्रिशक्ते श्री

विश्वमातर्भवदाज्ञयैव ॥ प्रातः समुत्थाय तव प्रियार्थं संसारयात्रामनुवर्तयिष्ये ॥ सं
सारयात्रामनुवर्त्तमानं त्वदाज्ञया दक्षिणकालिकेद्य ॥ स्पर्धातिरस्कारकलिप्रमाद
भयानि मां माभिभवंतु मातः ॥ २ ॥ जानामि धर्मं न च मे प्रवृत्तिः जानाम्यधर्मं न च मे
निवृत्तिः ॥ त्वया हृदंतः स्थितया महेशि यथा नियुक्तोस्मि तथा करोमि ॥ ३ ॥ इति
प्रार्थ्य ॥ अद्य पूर्वेद्युरहोरात्राचरितमुच्छ्वासनिश्वासात्मकं षट्शताधिकमेक
विंशतिसहस्रसंख्याकमजपाजपं मूलाधारादिब्रह्मरंध्रस्थितगणपत्यादि
देवताभ्यो यथाविभागं समर्पयामि नमः ॥ अद्य सूर्योदयादारभ्य उच्छ्वासनिश्वा
सात्मकमजपाजपमहं करिष्ये ॥ हंसमंत्रेण प्राणानायम्य ॥ ४ हंसः शिवः सोहं ॥

श्या· प·॥ ॥ २ ॥

२५ जपित्वा गुह्येतिजपं समर्प्य ॥ ॐ ह्रीं आत्मतत्वाय स्वाहा ॥ ॐ ह्रीं विद्यातत्वाय स्वाहा ॥ ॐ
ह्रीं शिवतत्वाय स्वाहा ॥ ॐ ह्रीं सर्वतत्वाय स्वाहा ॥ मणिधरिणि वज्रिणि महाप्रतिसरे रक्ष २
हुं फट् स्वाहा ॥ इति शिखां बध्वा ॥ एकवारं पूरकेण वायुमापूर्य कुंभकेन चतुर्वारं द्विवारं
रेचयेत् ॥ इति प्राणानायम्य ॥ ममोपात्त दुरि० श्रीदक्षिणकालिकाप्रसाद सिध्यर्थं
प्रातः संध्यामुपासिष्ये ॥ अस्याः श्रीदक्षिणाकालिका० ॥ भैरवऋ० ॥ ध्यानांतं कृत्वा
पुरस्थजले यंत्रं विभाव्य तत्र देवीमावाह्य तज्जलं किंचित् दक्षहस्तेन गृहीत्वा वामना
घ्राय ॥ लं वं रं यं हं ॥ १ ॥ मूलं ॥ ७ ॥ ॐ अमृतमालिनी स्वाहा ॥ ७ ॥ ततो वामहस्तेन गृ
हीत्वा दक्षहस्ते तत्वमुद्रया सप्तवारं संमार्ज्य शेषं तोयं तेजोविमृश्य अंकुलात्
तेन संयोज्य इडयांतः प्रविश्य देहस्थपापेन कलुषीजातं हस्तागतं विभाव्य स्ववामे
वज्रशिलायां ॐ ह्रीं ह्रीं पशु हुं फट् ॥ इति आस्फाल्य ॥ आचम्य ॥ अर्घ्यं गृहीत्वा
गायत्री मुच्चार्य ॥ श्रीमहाकालसहित दक्षिणकालिकायै एषोऽर्घ्यः स्वाहा ॥

श्रीगणेशाय नमः ॥ अथ श्यामापद्धतिः ॥ अथातो साधकः ब्राह्ममुहूर्ते उत्थाय मंत्रस्ना
नं भस्मधारणं च कृत्वा ॥ आसने उपविश्य मूलाधारादि चक्राणि ऊर्ध्वमुखानि कृत्वा मू
लाधारे चतुर्दलांतर्गत कर्णिकायां यवमात्र गर्ते स्वयंभू लिंगं सार्धत्रिवलयेन वेष्टि
तां प्रसुप्त भुजंगीमिव उदित सहस्र सूर्यवत्तेजोमयीं कुंडलिनीं ध्यात्वा ॥ ततो ब्रह्मरं
ध्रे सहस्रदल कमल कर्णिकायां अकथादि त्रिकोणस्थ गुरुं श्वेतवर्णं द्विभुजं वराभय
करं शांतं पद्मासनासीनं वामांकगत रक्तवर्ण प्रियया श्लिष्टदेहं ध्यात्वा ॥ ततो प्राणा
यामेन वायुना कुंडलिनीमुत्थाप्य सुषुम्णानाडी मार्गेण ब्रह्मरंध्रे नीत्वा गुरुरूप शिवा
येनैकीभूतां चिरं विभाव्य ततो चंद्रमंडल सुधाधारया स्वदेहमाप्लावितं विभा

नी २ २ प्रणम्य